# द्वितीयोध्याय:

## प्राग्वैदिककाले च ज्योतिषस्वरूपम्

## २.१ प्राग्वैदिककाले च ज्योतिषम्

प्राग्वैदिककालो हि वेदमन्त्रसङ्ग्रहादपि प्राचीनतरः कालः । न स ह्यस्माकं ज्ञानविषयः ।एतावदेव तद्विषये वक्तुं पार्यते यत्तदाऽपि ज्योतिषविषये स्वल्पमपि ज्ञानमवश्यमेवाऽऽसीद्यस्य यथायथं वा विकसितरूपं वेदमन्त्रेषु दृश्यते । **'अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह'"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः'इति शुश्रूम धीराणां ये नस्तद्वयाचचक्षिरे'** इत्यादिकथनैरेतत्सिद्ध्यति । सम्प्रत्यपि ग्रामीणजना दिगवबोधाय ध्रुवादिनक्षत्राणां समयज्ञानाय रात्रौ कृत्तिकानां साहाय्यं गृह्णन्ति । दिवा तु ते सूर्यगतिमधीत्य समयज्ञानं कुर्वन्ति सुदिने । सम्भवत्येतदज्ञातयुगस्यैवावशिष्टम् । ऋग्वेदे **'देवानां पूर्वे युगेऽसतः सदजायत । देवानां युगे प्रथमेऽसतः सदजायत'** इति यत्कथितं यच्च यः पश्यादुत्तरे युगे इत्यप्युक्तं तस्यायमेवाशयो भवितुमर्हति यद्वैदिकसंहितापूर्ववत्कालेऽपि काचन विशिष्टा सभ्यताऽऽसीदिति ।

वेदा हि नैव निश्चयेन ज्योतिषशास्त्रमात्रमुद्दिश्य प्रवृत्ताः । तेन तत्र नैतादृशः प्रसङ्गो येन ज्योतिषशास्त्रं व्याख्यातं स्यात् । तथापि इतरविषयप्रसङ्गवशाज्ज्यो-तिषविषयेऽपि यत्किञ्चिदुक्तं तेनैतज्ज्ञायते यत्तदाऽपि शास्त्रेऽस्मिन् मानवीयं ज्ञानं समृद्धमासीत् । तत्र तत्र गगनमण्डलं, सूर्याचन्द्रमसौ, नक्षत्राणि, ताराः, ऋतून्, मासान्, दिवसाँश्चादाय मनोहारि चमत्कारि वर्णनं समुपलभ्यते । प्रकरणेऽस्मिन् वेदशब्देन कात्यायनप्रतिज्ञासूत्रमनुसृत्य तस्य संहिताब्राह्मणभागौ गृहीतौ, मन्त्र-ब्राह्मणयोर्वेदनामध्येयमित्युक्तेः ।

आकाशमधिकृत्य तत्रोक्तं यद्यः स आकाशः स आदित्य एव । एतस्मिन्नुदिते सर्वमिदमाकाशते । इन्द्र एव स इति । तेन हि आकाशते द्योतते इत्याकाशः । तत्र पृथिव्या उपरिष्टादन्तरिक्षस्य तदुपरिष्टाद् दिवः प्रतिष्ठा वर्णिता । दिवि मेघस्यान्तरिक्षे वायोश्च स्थितिरपि वर्णिता दृश्यते ।

यथा –

**नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः ।**

**नमोस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः ।।**

एवमेव द्यावापृथिवीविषये तत्रोक्तम् –

**यदा वै द्यावापृथिवी संज्ञानाथेऽथ वर्षति ।**

**प्राणोदानी वै द्यावापृथिवी ।**

**इमौ वै लोकौ रेतः सिञ्चाविमौ ह्येव लोकौ रेतः**

**सिञ्चत इतो वा अमृध्वं रेतः सिञ्चति**

**धूमं साऽमुत्र वृष्टिर्भवति तामसावभुती**

**वृष्टि तदिमा अन्तरेण प्रजायन्ते ।।**

ऋग्वेदेऽप्युक्तम् –

**तिस्रो द्यावः सवितुर्दा उपस्था एका यमस्य भुवने विराषट् ।**

**आणि न रथ्यममृताभितस्थुः ।।**

विराजमधिकृत्य तत्रोक्तम् –

**‘नाभ्या आसीदन्तरिक्ष शीर्ष्णोद्यौः समवर्तत ।**

**पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन् ।।21।।**

**‘चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।**

**श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।22।।**

## २.२ ज्योतिषशास्त्रस्य स्वरूपम्

विश्वस्य ज्योतिः ज्योतिषम् । ‘द्युतेरिसिन्नादेश्च जः’[23] इत्यनेन सूत्रेण ज्वलितकर्मणो द्युतधातोरिसिन् प्रत्यये दकारस्य जकारादेशे गुणे सस्य षत्वे च कृते सति ज्योतिर्पदस्य निष्पत्तिर्भवति । द्योतते प्रकाशते अनेनेति ज्योतिः । ज्योतिः= ज्योतिस् + अच्= ज्योतिष (आप्टे अनुसारेण) । आकाशे यानि तेजःस्वरूपाणि पिण्डानि दृश्यन्ते तानि सर्वाण्येव ‘ज्योतिः’ शब्देनोच्यन्ते ।एतादृग् ज्योतिर्मयपिण्डानामाधारभूतं शास्त्रं ज्योतिषशास्त्रमिति ।[24] अत अनन्ताकाशमण्डले देदीप्यमानानि ग्रहनक्षत्राणि आधारीकृत्य विचारित विषय एव ज्योतिषशब्देन ज्ञायते । तत्र शात्र नाम किम् ? अपौरुषेयैः वेदैः पौरुषेयैः रामाणादिभिः मानवानां शुभकर्मसु प्रवृत्तिरशुभकर्मसु निवृत्तिश्च यत्रोपदिश्यते तच्छास्त्रमिति निगद्यते । यथोक्तम्-

---

[21]शुक्लयजुर्वेदः, अ.-३१, मं.-१५

[22]शुक्लयजुर्वेदः, अ.-३१, मं.-१४

[23] वै.सि.कौ., अ.२, उणादि- २७५

[24]वाचस्पत्यम् कोशः, पृ. ३१९३

**प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।**

**पुंसां येनोपदिश्येत्तच्छास्त्रमित्यभिधीयते ।।25।।**

नित्यं, वेदादिकं शास्त्रमपौरुषेयं कृतकं, कृत्यादिनिर्वृत्तं, पुरुषकृतं धर्मशास्त्रपुराणादिपौरुषेयं शास्त्रम् । प्रवृत्तिः शुभकर्मप्रावीण्यं, निवृत्तिरशुभकर्मसु असङ्गः, इत्येतादृशाभ्यामुभाभ्यां शास्त्राभ्यां येन पुसां प्रवृत्तिः निवृत्तिरूपदिश्येते तच्छास्त्रम् । तच्च शास्त्रं त्रिधा प्रथते- प्रभुसम्मितं, मित्रसम्मितं, कान्तासम्मितञ्च । अस्माकं ज्योतिषं त्रिषु शास्त्रेषु कस्यां कोटौ प्रवेष्टुमर्हतीति विचिकित्सायां प्रभुसम्मितशास्त्रकोटावेव तत् अन्तर्भवितुमर्हति । यतो हि वेदवद् ज्योतिषमपि प्रत्यक्षानुशासनेनैव भूत-भविष्यकालिकपदार्थान् निर्दिशति । किञ्च वेदाङ्गभूततयाऽप्यस्य प्रभुसम्मितशास्त्रत्वमपरिहार्यमेव । यथोक्तं भास्कराचार्येण-

**ज्योतिः शास्त्रफलं पुराणगणकैरादेश इत्युच्यते ।**

**नूनं लग्नबलाश्रितः पुनरयं तत् स्पष्टखेटाश्रयम् ।।**

**ते गोलाश्रयिणोऽन्तरेण गणितं गोलोऽपि न ज्ञायते ।**

**तस्माद्यो गणितं न वेत्ति स कथं गोलादिकं ज्ञास्यति ।।26।।**

ज्योतिषशास्त्रमिदं शुभाशुभफलदातृकालनिर्देशेन मानवसमाजं शुभकर्मणि प्रवृत्तमशुभकर्मणि निवृत्तं च करोति । ज्योतिषशास्त्रस्य परिभाषाव्युत्पत्तिप्रसङ्गे

---

[25]श्रीवैष्णवी- श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, २००१-०२, पृ. १२-१३

[26] सिद्धान्तशिरोमणिः, गोलाध्याये श्लोकः-६

प्रायशो मतैक्यं दृश्यते । सिद्धान्तशिरोमणिटीकायां नृसिंहदैवज्ञेन सूर्यादिग्रहाणामाधारीकृत्य निर्मितं शास्त्रं ज्योतिषमिति प्रतिपादितम् । यथा-

**ज्योतिंषि ग्रहनक्षत्राण्यधिकृत्य कृतो ग्रन्थो ज्योतिषम् ।**[27]

सूर्यादिग्रहाणामश्विनीप्रभृतिनक्षत्राणां गतिं स्थितिञ्चाधारीकृत्य कृतं शास्त्रं नाम ज्योतिषम् । यथा-

**ज्योतिषां सूर्यादिग्रहाणां बोधकं शास्त्रम् ।**[28]

शब्दकल्पद्रुमानुसारेण 'ज्योतिषम्' सूर्यादिग्रहाणां गतिमधिकृत्य वेदाङ्गविशेषोऽस्ति ।[29] अमरकोषस्य टीकायां ग्रहादिप्रतिपाद्यविषयबोधकं शास्त्रं ज्योतिषमिति कथितम् ।[30] हलायुधकोषे ज्योतिषार्थं सांवत्सर-गणक-दैवज्ञ-ज्योतिषक-ज्यौतिषी-मौहूर्तिक-सांवत्सरिकशब्दाः प्रयुक्ताः सन्ति । वाचस्पत्यमतानुसारेण सूर्यादिगतिबोधकं शास्त्रं ज्योतिषं तथा च विधिपूर्वकं तस्याध्येता 'ज्योतिर्विद्' इति कथ्यते ।[31]

ज्योतिषं ज्ञानमपि विज्ञानमपि । ज्ञानपरकत्वेनैतत् स्वकीयं शास्त्रीयरूपं धारयति । विज्ञानपरकत्वेन शास्त्रमिदं ग्रहनक्षत्रादीनां यथार्थस्थितिं बोधयति । ज्ञानस्वरूपादिदं शास्त्रं वेदानुकूलं शास्त्रान्तरानुकूलं चार्थं प्रतिपादयति । विज्ञानस्वरूपेण च तेनानीतानां पदार्थानां यथास्थितिं बोधयति ।

---

27 सि.शि. ग्र.ग्र., का. मा. पृ.११

28 भा.जयो. पृ. १७

29 श.कल्प. पृ. ५५०

30 अ.को. श्लो. ७७९, पृ.८६

31 वाच.प. पृ. ३१६२

ज्योतिषमेकमागमशास्त्रमस्ति । ज्योतिषशास्त्रं विज्ञानमेवास्ति । तत्र नास्ति मतद्वयम् । ज्योतिषशास्त्रस्यान्तर्गताः अनेकविधाः विभागास्सन्ति । ज्योतिषशास्त्रे अनन्तगूढार्थ-विषयाः सन्ति ।

वर्तमानकालानुसारेण ज्योतिषशास्त्रस्य उपयोगिता कया रीत्या भवति ? वर्तमानसमये एतस्य ज्योतिषशास्त्रस्य पूर्वार्धभागः मान्यरूपेण स्वीकृतोऽस्ति । अधुना भारतवर्षस्य एतत् – विषयसम्बन्धी अनेकविधशाखायां विज्ञानेन प्रमाणतया अधिकारः नैव भवति । एतत् सत्यमस्ति ।

ज्योतिषशास्त्रम् किमस्ति ? - सूर्यादिग्रहाणां स्थित्यनुसारेण मनुष्येषु उत्पत्तिः एवं स्थितिः तथा विकासः तेषां त्रयाणां विषये अनुकूलं तथा प्रतिकूलं विषयं ज्ञातुं शक्यते तत् शास्त्रस्य नाम ज्योतिषशास्त्रमस्ति ।

ज्योतिषशास्त्रम् 'सूर्यादिग्रहाणां बौधकशास्त्रम्' तथा 'कालगणना' प्रकार एव अस्ति । प्राचीनकाले ब्रह्म-शौनक-भृगृ-च्यवन-बृहस्पति-वशिष्ठ-पाराशर-अत्रि-मनु-पौलस्त्य-लोमश-मरिचि-अंगिरा-जैमिनी-व्यास-नारद-गर्ग-आर्यभट्ट-लल्ल-लगध-ब्रह्मगुप्त-वराहमिहिर-श्रीपति-भास्कराचार्य-मुनिश्वर-ज्ञानराज-कमलाकरभट्टाः एतेः प्राधान्यज्योतिषकारविद्वांसः सन्ति । नवीनेषु नीलाम्बर-बापूदेव-सुधारकर-शङ्करबालकृष्ण-योगेन्द्रचन्द्रकेतकर-आप्टेप्रभृतयो विद्वासः परिगण्यन्ते गणकत्वेन ।

ब्रह्मदेवानुसारेण ज्योतिषशास्त्रस्य एकं नाम वेदनेत्रमस्ति । वेदस्य हि षटस्वङ्गेषु ज्योतिषमन्यतममितितूक्तमेव । ज्योतिषं हि वेदस्य चक्षुरूपमस्ति ।

प्रथमं किन्नाम ज्यौतिषमिति जिज्ञासायं "ज्यौतिष" शब्दस्य व्युत्पत्तिरत्र समुपस्थाप्यते । द्युतधातोः द्योतते द्युत्यते वेति विग्रहे ज्योतिश्शब्दो निष्पद्यते ।

प्रथमन्तु ज्योतिः नक्षत्रादीन्यधीत्य कृतं शास्त्रं ज्यौतिषम् । ज्योतिषशब्दात् 'शेषे' इति सूत्रेण 'अणि' आदिवृद्धौ ज्यौतिषमिति । द्वितीयञ्च 'अर्श आदिभ्योऽच' अचि अनुबन्धलोपे विभक्तिकार्ये ज्योतिषमिति । अनयोः द्वयोः शब्दयोः व्युत्पत्या नक्षत्रादीनां सर्वासां स्थितीनां बोधकं शास्त्रज्योतिषमिति ।

अथ 'यस्मिन् शास्त्रे सूर्यादीनां ग्रहाणां नक्षत्राणां विविधकेतूनां स्वरूपसञ्चार-परिभ्रमणकालविविधगतीनां विचारस्तज्ज्ञानोपाय विवेचनानि सिद्धान्तानां निरूपणानि च भवेयुस्तज्ज्यौतिषशास्त्रमिति व्यपदिश्यते ।' कश्चिदेतादृशानि कथितानि- 'ज्यौतिषादिपिण्डानां आकाशस्थितग्रहाणाञ्च सम्यक् विवेचनं कर्तुं क्षमः तथा वर्तमान-भूत-भविष्यसम्बन्धे निर्णयकर्तृसम्बन्धिगुणोपेतं शास्त्रं ज्यौतिषशास्त्रम् ।' कुत्रचित् स्थले एतादृशव्युत्पत्तिलभ्योऽर्थः प्राप्यते-

'आकाशे ये खलु प्रकाशवन्तः पदार्थाः ग्रहनक्षत्राणि तारकाः केत्वादयश्च दृश्यन्ते ते सर्वे ज्यौतिषमन्वाज्ज्योतिरिति कथ्यन्ते ।' अन्तरिक्षान्य ज्यौतिष्मत्पिण्डापेक्षया भुवोऽपि ज्यौतिषत्त्वमुपलभ्यते, ज्यौतिरीतिशब्देन भुवोऽपि ग्रहणं भवति । अतः ज्यौतिषां ग्रहनक्षत्रादीनां विचारमधिकृत्य कृतं शास्त्रं ज्यौतिषशास्त्रमिति व्युत्पत्ति लभ्योऽर्थः ।[32]ज्यौतिषां सूर्यादिग्रहाणां बोधकं शास्त्रं ज्यौतिषम् ।[33]

पाश्चात्यानांमते तच्छास्त्रेणाकाशीयपिण्डानां भुवश्च गतिवैचित्र्यस्य तद्गतपदार्थानां प्रकाशस्य निर्माणक्षययोश्चाध्ययनं क्रियते । शुभाशुभविचारपक्षस्तैर्नाङ्गीक्रियते । भारतीयानां मते येषां ज्यौतिषपदार्थानां

---

[32] सिद्धान्तकौमुदी २/६७, उपादिद्वितीयपाद

[33] भारतीय ज्योतिष, पृ. १, (डॉ. नेमिचन्द्रशास्त्रीकृत)

पार्थिवजीवानामुपरिकश्चित्प्रभावो नापतति न तेषां विचारः क्रियते निष्प्रयोजनत्वात् (ज्यौतिषशास्त्रं ज्योतिः शास्त्रमित्यपि कथ्यते) । गर्गाचार्यस्त्वेनं शास्त्रं कालज्ञानमाद्यज्ञानं ज्योतिर्ज्ञानं ज्योतिषं ज्यौतिषमित्यादि-विविधनामभिर्विश्वे प्रसिद्धं वर्तते । आधुनिकवैज्ञानिकैरपि ज्यौतिषं सर्वेषां विज्ञानानां 'जनक' इति व्यवह्रियते ।

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**

**शास्त्रादस्मात् कालबोधो यतः स्योद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।**[34]

ज्योतिषशब्दस्यार्थोऽयं ज्योतिष्मत् पदार्थैः सह सम्बन्धं धारयति । किन्त्वत्र ज्योतिषशब्द आकाशीयपिण्डानां कृते एव व्यपदिश्यते । अतः वितते व्योम्नि विद्योत्तमानद्युचरतारकाततिमधिकृत्य विमृश्यमानो विषय एव ज्योतिषमिति सिद्ध्यति । पाणिनीयव्याकरणमनुश्रित्य 'अधिकृत्य कृते ग्रन्थे' इत्यनेन सूत्रेण अण् प्रत्यये ज्योतिषशब्दो निष्पद्यते, किन्तु भारतीयवाङ्मये सर्वत्र ज्योतिषशब्दस्यैव व्यवहारो दरीदृश्यते । अतोऽस्य व्युत्पादनम् 'अर्षादिभ्योऽच्' इत्यनेन मत्वर्थीयेऽचि प्रत्यये 'ज्योतिष'शब्दः निष्पद्यते । उक्तञ्च पाणिनीयशिक्षायाम् –

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।**

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।**[35]

---

34 सिद्धान्त-शिरोमणि-श्लो. ९, (पं. श्रीमुरलीधरकृत टिप्पणौ)

35पाणिनीशिक्षायाम् ४१-४२

भास्कराचार्येण यथोक्तम् —

**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तञ्च कल्पः करौ ।**

**या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द-आद्यैर्बुधैः ।।**[36]

वेदजन्यषडङ्गेषु ज्योतिषशास्त्रस्य बहुमहत्त्वं वर्तते यतोहि- यथा प्राणिनां शरीरे सर्वाङ्गयुक्तेऽपि नेत्राभावे किंकर्त्तव्यविमूढ इति भावस्य उत्पत्तिर्भवति तथैव वेदाङ्गेष्वपि पञ्चभिरङ्गैः सत्त्वेऽपि नेत्रत्वेनाख्यातः ज्योतिषशास्त्राभावे किमपि कर्तुं नैव शक्यते । यथोक्तं महर्षिणा —

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**

**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित् करः ।।**[37]

ज्योतिषेण द्योत्यते, इष्टानिष्टोभयप्रकृतिकानां यज्ञानां कालनिर्देशेन प्रकाशते । अतएव ज्योतिषस्य वेदाङ्गत्वम् । अस्माकं पूर्वजानामभिप्रेतसिद्ध्यर्थं पारलौकिकसुखप्राप्त्यर्थञ्च यज्ञानामनुष्ठानमत्यावश्यकम् । यज्ञविशेषाणां कृते समयनिर्धारणं नितान्तं प्रयोजनीयमासीत् । कालज्ञानञ्च पृथक्-पृथक् नक्षत्रैः सूर्याचन्द्रमसोः स्थित्यायतमासीत् । अत एतदर्थं ज्योतिषं विहाय इतरत् साधनं नैवासीत् इति । अतः उक्तं लगधेन —

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञम् ।।**[38]

---

36 सि.शि., ग.का. श्लो.-१०

37 सि.शि., ग.का. श्लो.-११

38 याजुष ज्योतिषम्, श्लो. ३

इदानीं ज्यौतिषशास्त्रविभागमुपजीव्य किञ्चिद् विचार्यते । यतोहि भारतीयज्यौतिषशास्त्रस्य क्षेत्रमतिविशदं विद्यते । तत्र मानवजीवनसम्बन्धितानां बहूनामेव विषयाणां वर्णनानि शास्त्रीयविचाराश्च विद्यन्ते । तत्र षडङ्गज्यौतिषशास्त्रस्य त्रयोवयवा एव मुख्यत्वेन सिद्धान्त-संहिता-होराभेदेन मन्यन्ते दैवज्ञैः । तेषाम्मतेन प्रश्नशाकुनयोरन्तर्भावो संहितायामेव परन्तु साम्प्रतं केचन शाकुनं प्रश्नशास्त्रञ्च स्वतन्त्रम्मत्वा ज्यौतिषशास्त्रस्य पञ्चावयवान् स्वीकुर्वन्ति । प्रधानतया बहुसम्मततया त्रयोभेदा एव युक्तियुक्तं शास्त्रसम्मतञ्चानुभूयते प्राचीनकालतोऽद्य प्रभृतिः । आचार्यवाराहमिहिरेणापि मुख्यरूपेण त्रयो भेदा एव स्वीकृताः । यतोहि —

**ज्यौतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् ।**

**तत्कात्र्न्योपनयस्य नाममुनिभिः संकीर्त्यते संहिता ।।**

**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ ।**

**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।**[39]

नारदोऽपि स्कन्धत्रयात्मकमेव ज्यौतिषशास्त्रस्य स्वरुपं स्वीकरोति-

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् ।**

**वेदस्य निर्मलं चक्षुः ज्यौतिः शास्त्रमकल्मषम् ।।**[40]

अपि च-

---

39 बृहत्संहिता, उपनयनाध्याये अ. १, श्लो.-६

40 नारदसंहिता, पृ. ४

**त्रिष्कन्धं ज्यौतिषं शास्त्रं चतुर्लक्षमुदाहृतम् ।**

**गणितं जातकं विप्र संहिता स्कन्ध संज्ञितम् ।।**[41]

गर्गाचार्यमतानुसारं गणितं जातकं शाखा (संहिता) चेति त्रयः स्कन्धाः स्वीकृताः । श्रीमता भास्कराचार्येणापि सिद्धान्तमथवा गणितं संहिता जातकञ्चेति स्कन्धत्रयमेव स्वीकृतम् । एवं भारतीयज्यौतिषशास्त्रस्य सिद्धान्तमथवा गणितं होरा अथवा जातकं शाखा अथवा संहिता चेति स्कन्धत्रय एव सर्वसम्मतत्वात् पर्यवसितं भवति । इत्थम्अनुत्तममिदं ज्योतिषशास्त्रं वेदस्य निर्मलं चक्षुरिति स्पष्टम्।

## २.३ ज्योतिषशास्त्रस्योद्देश्यम्

यदि सम्यक्तया विचार्यते तर्हि मानवजीवनस्य प्रत्येकस्मिन् क्षेत्रे कार्यकलापे च ज्योतिषशास्त्रस्य साहाय्यमन्तः प्रविष्टमवलोक्यते । किमधिकम् मानवसमाजस्य सभ्यता संस्कृतयोर्विकासे सर्वाधिकं महत्त्वं ज्यौतिषशास्त्रस्यैव विद्यते । ज्यौतिषमन्तरामहापुरुषाणां जयन्तीस्मृतिदिवसयोरायोजनं तत्कालज्ञानात्कथं सम्पद्यते ? खयादिसप्तवाराणां वैशाखादिद्वादशमासानां अश्विन्यादिसप्त-विंशतिनक्षत्राणां प्रतिपदादिपञ्चदशतिथिनां विष्कुम्भादिसप्त-विंशयोगानां करणानां वसन्तादिऋतूनां च क्रमबद्धज्ञानं तु ज्यौतिषशास्त्रादेव भवितुं शक्यते । कदा वसन्तः, कदा च वर्षा इत्यादीनां ज्ञानविरहात् कृषकाणां क्षेत्रेषु कर्षणवपनादीनां प्रयोगः कथं सिद्ध्यते ? कृषिकर्मणि सम्पादितप्रयोगमू-लधनतुल्योपलब्धावपि हानिरेव सम्पद्यते । आधुनिकयुगे त्वेतच्छास्त्रस्या-निर्वचनीयं योगदानमस्ति । अस्मिन् सञ्चारयुगे शतशः सहस्रशः पोताः महासागरेषु

---

[41] संक्षिप्त नारदपुराणस्य द्वितीयपादे

कथं स्वकीयं लक्ष्यस्थानं न प्राप्नुयुः । वायुयानचालकाः कथं क्षणे देशाद्देशान्तरं प्रापणे समर्थाः भवेयुः ।

अपि च कदा वर्षारम्भः ? कदा च वर्षान्तः ? कदा स्वतन्त्रतादिवसः ? कदा च गणतन्त्रदिवसः ? ग्रहणं-गोविन्दद्वादशी-कुम्भयोगादयः एतच्छास्त्रज्ञानं विना पूर्वतोऽज्ञात्वा कथञ्च तेषु तीर्थादौ मज्जन-दर्शन-गमनसौभाग्यं लभ्यते इत्यशक्यमेव । कथं च कृष्णजन्माष्टमी-दशहरा-जीवत्पुत्रिका-दीपावली-होली-रामनवमी-एकादशीप्रभृतिव्रतानि कदा भविष्यन्तीति ज्यौतिषशास्त्रज्ञानमन्तरा वेत्तुं शक्यन्ते ? अथ च कथं पितुः सांवत्सरिकं ज्ञायते ? कथञ्च यात्रासम्बन्धितज्ञानं सम्पद्यते ? बालकानां सकल संस्कारसुमुहूर्तानां एतच्छास्त्रस्यावगमादेव ज्ञातुं शक्यन्ते नान्येन इति । सुमुहूर्ते कृतसंस्कारेण जडोऽप्यकर्मकः वा स्फूर्तिमान्, निरोगी, विद्याविन-यशीलः सुखशाली च जायते । तथा च कुमुहूर्ते कृतसंस्कारेण सल्लक्षणोऽपि शिशुः सद्यः कुलक्षणयुक्तो भवति । किमधिकतमं ज्योतिषशास्त्रस्योपयोगित्वं भवेद्, वस्तुतो जगतां सकलव्यापारमात्रमेवैतच्छास्त्रेणैव भवतीति निश्चप्रचम् । ज्योतिष-शास्त्रस्य स्कन्धत्रयेषु होरास्कन्धे जन्मकुण्डली फलविचारात्मकं जातकम्, संस्कारादिमुहूर्तग्रन्थाः, भूशोधनार्थं वास्तुविद्या, तात्कालिकफलज्ञानाय वर्षपत्र-साधकताजिकग्रन्थाः, शरीरलक्षणाच्छुभाशुभफलद्योतकाः सामुद्रिकग्रन्थाः, प्रश्न-कालमाधृत्यशुभाशुभफ-लविचारकाः प्रश्नग्रन्थाः वर्तन्ते ।

### २.४ ज्योतिषशास्त्रस्य विकास:

ज्योतिषशास्त्रमपि शास्त्रान्तरवत्कतिपय-अवस्थाः अतिक्रम्य साम्प्रतिक-मवस्थां प्राप्तं दृश्यते । जिज्ञासा हि मानवस्य मौलिकप्रवृत्तिष्वन्यतमा । यथा हि स भोक्तुमिच्छति, पातुमिच्छति, रन्तुमिच्छति, आत्मानं प्रकटयितुमिच्छति तथैव स

स्वं परञ्च ज्ञातुमिच्छति । जिज्ञासव ज्ञानस्याविष्कारिणी । ग्रहनक्षत्रविषयक-जिज्ञासैव ज्योतिशास्त्रस्याविर्भावे हेतुः । व्यवहारान्तरे पशुवदपि मानवोऽनादि-कालादेव दिवस-रात्रि-अयनादिविषये स्वल्पमपि जानाति स्म । स हि सूर्या-चन्द्रमसौ, तारा, ग्रहनक्षत्राणि च दृष्ट्वा कामं तेषां वैशिष्ट्यं नैव जानाति स्म, तथापि तदवस्थितमादाय यत्किञ्चिदपि चिन्तनमवश्यमेव करोति स्म । तदेव चिन्तनमनुभवोपचितं वैदिकसंहितासु प्रस्फुटितं दृश्यते पश्चाच्च नवनवानु-भवसंयोजनपूर्वकं लौकिकग्रन्थेष्वपि । तेन हि ज्योतिषशास्त्रस्य विकासः पञ्चसु अवस्थासु विभक्तो दृश्यते – प्राग्वैदिककालः, वैदिकसंहिताकालः, वेदाङ्गकालः, सिद्धान्तकालः आधुनिककालश्चेति अथवा अज्ञातकालः, आदिकालः, पूर्वमध्य-मकालः, उत्तरमध्यमकालः आधुनिककालश्चेति । अस्य हि प्राग्वदिककालोऽज्ञात-कालो वा नितान्तमेवातज्ञातोऽस्माभिः । वैदिकसंहितासु यादृशं ज्योतिषस्य स्वरूपं द्रष्टुं लभ्यते तदाधारेण वयमनुमातुं प्रभवामो यत्तत्पूर्वमपि ज्योतिषस्य यत्किञ्चिदपि स्वरूपं सुनिश्चितमासीदिति । वैदिककालश्चास्य ऋग्वेदकालादारभ्य लगधकाल-पर्यन्तं चलति । यद्यपि वेदानामपौरुपेयत्वादनादिनि धनत्वं सर्वैः स्वीक्रियते तथापि वयमत्र तेषां सङ्ग्रहेण प्रयोजनं गृह्णीमः । तेन ऋग्वैदिककालस्तदैव यदा या हि ऋचः सम्प्रति लभ्यन्ते तासां सङ्ग्रहकाल एव न तु प्रणयनप्रवचनकालः । लगधस्य वेदाङ्गज्योतिषमारभ्यास्य पूर्वमध्यमकाल उदेति चलति च आर्यभटस्य आर्यभटीयाविर्भावपर्यन्तम् । सिद्धान्तानां स्थिरीकरणं ज्योतिषस्य त्रिषु स्कन्धेषु स्पष्टतया विभाजनं पञ्चाङ्गाविर्भावश्चास्य कालस्य वैशिष्ट्यानि । आर्यभटस्य आर्यभटीयमारभ्य कमलाकरस्य सिद्धान्ततत्त्वविवेकपर्यन्तं चलति उत्तरार्द्धोऽस्य आर्यभट-ब्रह्मगुप्त-वराहमिहिर-भास्करा-चार्य-कमलाकरभट्टाः कालस्यास्य

ख्यातयशस्काः ज्योतिर्विदः । ततश्चोदेति आधुनिककालोऽस्य । चापीयत्रिकोण-गणितकारो नीलाम्बरः, सरलत्रिकोणमितेः प्रणेता बाबूदेवः, गणकतरङ्गिणी-प्रभृतिंग्रन्थानां प्रणेता सुधाकरः ज्योतिशास्त्रेतिहासस्य प्रणेता शङ्कबालकृष्णश्च कालस्यास्य लब्धप्रतिष्ठा ज्योतिर्विदः ।

कमलाकरभट्टपर्यन्तमपि आर्यभट्टीया प्राचीना रीतिरेवानुसृता दृश्यते । वराहमिहिरो ज्योतिषे यवनप्रभावं स्वीकरोति । तेन च त्रय एव स्कन्धा ज्योतिषस्य स्वलेखनीविषयीकृताः । यथा उत्तरमध्यमकाले यावनगणकैः सह भारतीयगणकानां सम्मेलनेन ज्योतिषशास्त्रे नवीनता प्रविष्टा तथैव आरवगणकसम्पर्केण च । ताजिकं हि तेषामेव प्रबावफलमत्र । नीलाम्बरादारभ्य आङ्गलसम्पर्केण गणिते नवीना परिपाटी प्रविष्टा । परिचिन्तनमपि किञ्चिन्मौलिकं सञ्जातं तथापि सुदृढमूला भारतीयपद्धतिर्न कथमपि स्वकीयवैशिठ्यं तु विहातुं प्रभवति । कालप्रभावस्तु तत्रापि सक्रिय एव तथापि ।

अत्रापीदं स्मर्यते –

**'पुङ्खानुपुङ्खविषयेक्षणतत्परोऽपि ब्रह्मावलोकनदियं न जहाति योगी ।**

**सङ्गीतनृत्यलयतालवशङ्गतापि मौलिस्थकुम्भपरिरक्षणधीर्नटीव ।।**

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।।'**